श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षड्सप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्सप्ततितमः सर्गः ॥

## श्रीरामेण शम्बूकस्य वधस्तस्य देवैः प्रशंसनम् अगस्त्याश्रमे महर्षिणागस्त्येन तस्य सत्कारस्तदर्थमाभूषणदानं च

तस्य तद् वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः।
अवाक्शिरास्तथाभूतो वाक्यमेतदुवाच ह ॥ **7.76.1** ॥

शूद्रयोन्यां प्रजातोऽस्मि तप उग्रं समास्थितः।
देवत्वं प्रार्थये राम सशरीरो महायशः ॥ **7.76.2** ॥

न मिथ्याहं वदे राम देवलोकजिगीषया।
शूद्रं मां विद्धि काकुत्स्थ शम्बूकं नाम नामतः ॥ **7.76.3** ॥

भाषतस्तस्य शूद्रस्य खड्गं सुरुचिरप्रभम्।
निष्कृष्य कोशाद् विमलं शिरश्चिच्छेद राघवः ॥ **7.76.4** ॥

तस्मिञ्शूद्रे हते देवाः सेन्द्राः साग्निपुरोगमाः।
साधुसाध्विति काकुत्स्थं ते शशंसुर्मुहुर्मुहुः ॥ **7.76.5** ॥

पुष्पवृष्टिर्महत्यासीद् दिव्यानां सुसुगन्धिनाम्।
पुष्पाणां वायुमुक्तानां सर्वतः प्रपपात ह ॥ **7.76.6** ॥

सुप्रीताश्चाब्रुवन् रामं देवाः सत्यपराक्रमम्।
सुरकार्यमिदं देव सुकृतं ते महामते ॥ **7.76.7** ॥

गृहाण च वरं सौम्य यं त्वमिच्छस्यरिन्दम।
स्वर्गभाङ् नहि शूद्रोऽयं त्वत्कृते रघुनन्दन॥ **7.76.8** ॥

देवानां भाषितं श्रुत्वा रामः सत्यपराक्रमः।
उवाच प्राञ्जलिर्वाक्यं सहस्राक्षं पुरन्दरम्॥ **7.76.9** ॥

यदि देवाः प्रसन्ना मे द्विजपुत्रः स जीवतु।
दिशन्तु वरमेतं मे ईप्सितं परमं मम॥ **7.76.10** ॥

ममापचाराद् बालोऽसौ ब्राह्मणस्यैकपुत्रकः।
अप्राप्तकालः कालेन नीतो वैवस्वतक्षयम्॥ **7.76.11** ॥

तं जीवयत भद्रं वो नानृतं कर्तुमर्हथ।
द्विजस्य संश्रुतोऽर्थो मे जीवयिष्यामि ते सुतम्॥ **7.76.12** ॥

राघवस्य तु तद् वाक्यं श्रुत्वा विबुधसत्तमाः।
प्रत्यूचू राघवं प्रीता देवाः प्रीतिसमन्वितम्॥ **7.76.13** ॥

निर्वृतो भव काकुत्स्थ सोऽस्मिन्नहनि बालकः।
जीवितं प्राप्तवान् भूयः समेतश्चापि बन्धुभिः॥ **7.76.14** ॥

यस्मिन् मुहूर्ते काकुत्स्थ शूद्रोऽयं विनिपातितः।
तस्मिन् मुहूर्ते बालोऽसौ जीवेन समयुज्यत॥ **7.76.15** ॥

स्वस्ति प्राप्नुहि भद्रं ते साधु याम नरर्षभ।
अगस्त्यस्याश्रमपदं द्रष्टुमिच्छाम राघव॥ **7.76.16** ॥

तस्य दीक्षा समाप्ता हि ब्रह्मर्षेः सुमहाद्युतेः।
द्वादशं हि गतं वर्षं जलशय्यां समासतः॥ **7.76.17** ॥

काकुत्स्थ तद् गमिष्यामो मुनिं समभिनन्दितुम्।
त्वं चापि गच्छ भद्रं ते द्रष्टुं तमृषिसत्तमम्॥ **7.76.18** ॥

स तथेति प्रतिज्ञाय देवानां रघुनन्दनः।
आरुरोह विमानं तं पुष्पकं हेमभूषितम्॥ **7.76.19** ॥

ततो देवाः प्रयातास्ते विमानैर्बहुविस्तरैः।
रामोऽप्यनुजगामाशु कुम्भयोनेस्तपोवनम्॥ **7.76.20** ॥

दृष्ट्वा तु देवान् सम्प्राप्तानगस्त्यस्तपसां निधिः।
अर्चयामास धर्मात्मा सर्वांस्तानविशेषतः॥ **7.76.21** ॥

प्रतिगृह्य ततः पूजां सम्पूज्य च महामुनिम्।
जग्मुस्ते त्रिदशा हृष्टा नाकपृष्ठं सहानुगाः॥ **7.76.22** ॥

गतेषु तेषु काकुत्स्थः पुष्पकादवरुह्य च।
ततोऽभिवादयामास अगस्त्यमृषिसत्तमम्॥ **7.76.23** ॥

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा।
आतिथ्यं परमं प्राप्य निषसाद नराधिपः॥ **7.76.24** ॥

तमुवाच महातेजाः कुम्भयोनिर्महातपाः।
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव॥ **7.76.25** ॥

त्वं मे बहुमतो राम गुणैर्बहुभिरुत्तमैः।
अतिथिः पूजनीयश्च मम राजन् हृदि स्थितः॥ **7.76.26** ॥

सुरा हि कथयन्ति त्वामागतं शूद्रघातिनम्।
ब्राह्मणस्य तु धर्मेण त्वया जीवापितः सुतः॥ **7.76.27** ॥

उष्यतां चेह रजनीं सकाशे मम राघव।
प्रभाते पुष्पकेण त्वं गन्तासि पुरमेव हि॥ **7.76.28** ॥

त्वं हि नारायणः श्रीमांस्त्वयि सर्वं प्रतिष्ठितम्।
त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः॥ **7.76.29** ॥

इदं चाभरणं सौम्य निर्मितं विश्वकर्मणा।
दिव्यं दिव्येन वपुषा दीप्यमानं स्वतेजसा॥ **7.76.30** ॥

प्रतिगृह्णीष्व काकुत्स्थ मत्प्रियं कुरु राघव।
दत्तस्य हि पुनर्दाने सुमहत् फलमुच्यते॥ **7.76.31** ॥

भरणे हि भवाञ्शक्तः फलानां महतामपि।
त्वं हि शक्तस्तारयितुं सेन्द्रानपि दिवौकसः॥ **7.76.32** ॥

तस्मात् प्रदास्ये विधिवत् तत् प्रतीच्छ नराधिप।
अथोवाच महात्मानमिक्ष्वाकूणां महारथः॥ **7.76.33** ॥

रामो मतिमतां श्रेष्ठः क्षत्रधर्ममनुस्मरन्।
प्रतिग्रहोऽयं भगवन् ब्राह्मणस्याविगर्हितः॥ **7.76.34** ॥

क्षत्रियेण कथं विप्र प्रतिग्राह्यं भवेत् ततः।
प्रतिग्रहो हि विप्रेन्द्र क्षत्रियाणां सुगर्हितः॥ **7.76.35** ॥

ब्राह्मणेन विशेषेण दत्तं तद् वक्तुमर्हसि।
एवमुक्तस्तु रामेण प्रत्युवाच महानृषिः॥ **7.76.36** ॥

आसन् कृतयुगे राम ब्रह्मभूते पुरायुगे।
अपार्थिवाः प्रजाः सर्वाः सुराणां तु शतक्रतुः॥ **7.76.37** ॥

ताः प्रजा देवदेवेशं राजार्थं समुपाद्रवन्।
सुराणां स्थापितो राजा त्वया देव शतक्रतुः॥ **7.76.38** ॥

प्रयच्छास्मासु लोकेश पार्थिवं नरपुङ्गवम्।
यस्मै पूजां प्रयुञ्जाना धूतपापाश्चरेमहि॥ **7.76.39** ॥

न वसामो विना राज्ञा एष नो निश्चयः परः।
ततो ब्रह्मा सुरश्रेष्ठो लोकपालान् सवासवान्॥ **7.76.40** ॥

समाहूयाब्रवीत् सर्वांस्तेजोभागान् प्रयच्छत।
ततो ददुर्लोकपालाः सर्वे भागान् स्वतेजसः॥ **7.76.41** ॥

अक्षुपञ्च ततो ब्रह्मा यतो जातः क्षुपो नृपः।
तं ब्रह्मा लोकपालानां समांशैः समयोजयत्॥ **7.76.42** ॥

ततो ददौ नृपं तासां प्रजानामीश्वरं क्षुपम्।
तत्रैन्द्रेण च भागेन महीमाज्ञापयन्नृपः॥ **7.76.43** ॥

वारुणेन तु भागेन वपुः पुष्यति पार्थिवः।
कौबेरेण तु भागेन वित्तपाभां ददौ तदा॥ **7.76.44** ॥

यस्तु याम्योऽभवद् भागस्तेन शास्ति स्म स प्रजाः।
तत्रैन्द्रेण नरश्रेष्ठ भागेन रघुनन्दन॥ **7.76.45** ॥

प्रतिगृह्णीष्व भद्रं ते तारणार्थं मम प्रभो।
तद् रामः प्रतिजग्राह मुनेस्तस्य महात्मनः॥ **7.76.46** ॥

दिव्यमाभरणं चित्रं प्रदीप्तमिव भास्करम्।
प्रतिगृह्य ततो रामस्तदाभरणमुत्तमम्॥ **7.76.47** ॥

आगमं तस्य दीप्तस्य प्रष्टुमेवोपचक्रमे।
अत्यद्भुतमिदं दिव्यं वपुषा युक्तमद्भुतम्॥ **7.76.48** ॥

कथं वा भवता प्राप्तं कुतो वा केन वाऽऽहृतम्।
कौतूहलतया ब्रह्मन् पृच्छामि त्वां महायशः॥ **7.76.49** ॥

आश्चर्याणां बहूनां हि निधिः परमको भवान्।
एवं ब्रुवति काकुत्स्थे मुनिर्वाक्यमथाब्रवीत्॥ **7.76.50** ॥

**शृणु राम यथावृत्तं पुरा त्रेतायुगे युगे॥ 7.76.51 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षट्सप्ततितमः सर्गः॥